द्वितीयः पाठः

# लोष्ठश्रृगालयोः मित्रता

अस्ति लोष्ठश्रृगालयोः मध्ये मित्रता। एकदा श्रृगालः लोष्ठम् अवदत्– मित्र! चलतु तडागात् स्नात्वा आगच्छावः। लोष्ठमवदत् मित्र! अहं जलात् बिभेमि। अहं स्नानं न करिष्यामि। यद्यहं स्नामि तर्हि ज्वरेण पीडितो भविष्यामि। श्रृगालः अवदत्–मा स्नातु परं मया सह गन्तुं शक्नोसि। तदनन्तरं लोष्ठं तडागं गन्तुं तत्परमभवत्। तडागे गत्वा श्रृगालः सम्यक् स्नानमकरोत्। तथा च लोष्ठोपरि जलमक्षिपत्। जलपातेन लोष्ठं गलितं जातम्। श्रृगालः अवदत्– मित्र! आगच्छतु, आगच्छतु। यदा लोष्ठं जलात् बहिः न आगच्छत् तदा श्रृगालः तडागमकथयत्– महयं मम मित्रं देहि,अन्यथा मत्स्यं देहि। तदनन्तरं तडागः तस्मै मत्स्यमददात्।



श्रृगालः मत्स्यं नीत्वा तं स्थाणौ संस्थाप्य भ्रमणाय च गतः। यावत् सः आगच्छति तावत् मत्स्यं काकः खादितवान्। तदा श्रृगालः स्थाणुमुवाच– महयं मत्स्यं देहि अन्यथा काष्ठं देहि। अतः स्थाणुः तस्मै काष्ठमददात्। सः काष्ठमादाय कस्याश्चित् वृद्धायाः गृहं गतः। तद्गृहे काष्ठं

संस्थाप्य भ्रमणार्थं गतः। सा वृद्धा काष्ठं चुल्लिकायां ज्वालयित्वा 'वटिका भूञ्जिका' इति पकवानं पक्ववती। यदा श्रृगालः भ्रमित्वा न्यवर्तयत् तदा सः अपश्यत् यत् वृद्धा तस्य काष्ठं प्रज्ज्वाल्य सोल्लासेन वटिकां निर्मितवती। श्रृगालः तामकथयत्– मम काष्ठस्य प्रत्युपकारे काष्ठं वा वटिकां देहि। वृद्धा तस्मै वटिकां प्रायच्छत्। वटिकां गृहीत्वा वनं प्रति प्रस्थितः। सः स्ववटिकां अजाचारिकायै बालिकायै प्रदाय अटणार्थं च गतवान्। अजाचारिका बालिका वटिकां निष्कास्य खादितवती। यदा श्रृगालः आगत्य अपश्यत्। तदा तत्र वटिका नासीत्। श्रृगालः अजाचारिकां बालिकामकथयत् – मम वटिकां अजां वा ददातु तदा सा बालिका तस्मै एकामजामददात्।

श्रृगालः अजां गृहीत्वा विवाहगृहे बद्धवा अटनाय प्रस्थितः। यदा सः पुनः विवाहगृहे आगच्छत् तदा अजामप्राप्य उपस्थितान् जनान् अपृच्छत् – अहं अत्र एकां अजां बद्धवा गतवान् ताम् अजां कः नीतवान्? यूयं मह्यं मम अजां वधूं वा यच्छ। श्रृगालाय ते वधूं दत्तवन्तः। श्रृगालः स्वकार्ये सफलः अभवत्। सः वधूं नीत्वा स्वगृहमगच्छत्। सः वधूं धान्यकूटनाय निर्देशितवान्। वधू धान्यकूटने संसक्ता। अनन्तरं श्रृगालः एकं कुक्कुटमादाय आगच्छत्। तत्क्षणैव वधू तस्य शिरसि मूसलप्रहारं कृतवती। तेन प्रहारेण श्रृगालो मृतः जातः।

तदुपरान्ते वधू स्वपितृगृहे गतवती। यदा सा परिवारेण सह मेलनं कुर्वती आसीत् तदैव तत्र पित्रा विवाहार्थं निश्चितः वरागतः। तेन वरेण सह सोल्लासेन वध्वाः परिणयः अभवत्। वरस्य ज्ञातिभिः जनैः वध्वाः स्वागतं कृतम्। तौ सुखेन न्यवसताम्।

## शब्दार्थाः

| | | |
|---|---|---|
| लोष्ठम् | = | मिट्टी का ढेला |
| बिभेमि | = | डरता हूँ |
| सम्यक् | = | भली भाँति |
| अक्षिपत् | = | छिड़का / फेंका |
| स्थाणुमः | = | ठूँठ |
| संस्थाप्य | = | स्थापित कर |

| | | |
|---|---|---|
| नीतः (नी+क्त) | = | ले गया |
| चूल्लिकायां | = | चूल्हे में |
| ज्वालयित्वा | = | जलाकर |
| वटिका | = | बड़ा |
| भुञ्जिका | = | भजिया/खाद्य वस्तु |
| न्यवर्तयत् | = | लौटा |
| प्रत्युपकारे | = | बदले में |
| अजाचारिका | = | बकरी चराने वाली |
| अटनार्थम् | = | घूमने के लिए |
| बद्ध्वा | = | बाँधकर |
| प्रस्थितः | = | प्रस्थान किया |
| धान्यकूटनाय | = | धान कूटने के लिए |
| कुक्कुटम् | = | मुर्गी को |
| निर्देशितवान् | = | निर्देश दिया |
| संसक्ता | = | संलग्न हो गई/जुट गई |
| कुर्वती | = | करती हुई |
| परिणयः | = | विवाह |

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –**

(क) कयोः मध्ये मित्रता अभवत्?
(ख) तडागे गत्वा शृगालः किमकरोत्?
(ग) शृगालः तडागं किमकथयत्?
(घ) शृगालः मत्स्यं कुत्र संस्थापितवान्?
(ङ) शृगालः स्थाणुं किमुवाच?

**2. निम्नलिखितानां प्रश्नानाम् उत्तराणि हिन्दीभाषया लिखत।**

(क) वृद्धा किं पक्ववती?

(ख) अजाचारिका बालिका कां खादितवती?

(ग) शृगालः अजाचारिकां बालिकां किमकथयत्?

(घ) शृगालः वधूं किं निर्देशितवान् ?

(ङ) वरस्य ज्ञातिभिः जनैः कस्य स्वागतं कृतम्?

**3. रिक्तस्थानानि पूरयत् –**

(क) अहं ..........................बिभेमि।

(ख) जलपातेन ....................विनष्टं जातम्।

(ग) काष्ठं स्थाप्य ..........................गतः।

(घ) सः स्ववटिकां .................बालिकायै दत्तवान्।

(ङ) तां अजां कः ..................................... ।

**4. सन्धिविच्छेदं कुरुत –**

1. न्यवर्तयत् =
2. लोष्ठोपरि =
3. नासीत् =
4. प्रत्युपकारे =
5. सोल्लासेन =

5. धातुप्रत्यययोः विभागं कुरुत।

| | | |
|---|---|---|
| 1. | स्नात्वा | = |
| 2. | गन्तुम् | = |
| 3. | संस्थाप्य | = |
| 4. | गतः | = |
| 5. | खादितवान् | = |
| 6. | निर्मितवती | = |

6. अधोलिखितानां शब्दानां धातु–लकारपुरुष–वचनानि लिखत ।

| | शब्दाः | धातु | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| यथा– | चलतु | चल् | लोट् | प्रथम | एक |
| 1. | आगच्छावः | ––––– | ––––– | ––––– | ––––– |
| 2. | बिभेमि | ––––– | ––––– | ––––– | ––––– |
| 3. | करिष्यामि | ––––– | ––––– | ––––– | ––––– |
| 4. | शक्नोसि | ––––– | ––––– | ––––– | ––––– |
| 5. | अवदत् | ––––– | ––––– | ––––– | ––––– |

7. अधोलिखितानां पदानां मूलशब्द–विभक्ति–वचनानि लिखत –

| | शब्दाः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| 1. | तडागात् | ––––– | ––––– | ––––– |
| 2. | ज्वरेण | ––––– | ––––– | ––––– |
| 3. | चूल्लिकायाम् | ––––– | ––––– | ––––– |
| 4. | तस्मै | ––––– | ––––– | ––––– |
| 5. | शिरसि | ––––– | ––––– | ––––– |

8. निर्देशानुसारेण उत्तराणि लिखत –

श्रृगालः मत्स्यं नीत्वा तं स्थाणौ संस्थाप्य भ्रमणाय च गतः। यावत् सः आगच्छति तावत् मत्स्यं काकः खादितवान्। तदा श्रृगालः स्थाणुमुवाच–मह्यं मत्स्यं देहि अन्यथा काष्ठं देहि। अतः स्थाणुः तस्मै काष्ठमददात्। सः काष्ठमादाय कस्याश्चित् वृद्धायाः गृहं गतः, तद्गृहे काष्ठं संस्थाप्य भ्रमणार्थं गतः। सा वृद्धा काष्ठं चुल्लिकायां ज्वालयित्वा वटिका–भुञ्जिजका' इति पकवानं पचितवती। यदा श्रृगालःभ्रमित्वा न्यवर्तयत् तदा सः अपश्यत् यत् वृद्धा तस्य काष्ठं प्रज्वालयित्वा सोल्लासेन वटिकां निर्मितवती। श्रृगालःतामकथयत्– मम काष्ठस्य प्रत्योपकारे काष्ठं वा वटिकां देहि। वृद्धा तस्मै वटिकां प्रायच्छत्। वाटिकां गृहीत्वा वनं प्रति प्रस्थितः। सः स्ववटिकां अजाचारिका–बालिकां प्रदत्तः अटणार्थं च गतवान्। अजाचारिका बालिका वटिकां निष्कास्य खादितवती। यदा श्रृगालः आगत्य अपश्यत्। तदा तत्र वटिका नासीत्। श्रृगालः अजाचारिकां बालिकामकथयत्– मम वटिकां अजां वा ददातु। तदा सा बालिका तस्मै एकाम् अजामददात्।

प्रश्न 1. – उपरोल्लेखित–गद्यांशमधीत्य ल्यप्, क्त्वा, क्त्, क्तवत् इति प्रत्ययान्तशब्दान् लिखत।

| प्रत्यय | | उदाहारण |
|---|---|---|
| 1. | ..................... | ..................... |
| 2. | ..................... | ..................... |
| 3. | ..................... | ..................... |
| 4. | ..................... | ..................... |
| 5. | ..................... | ..................... |

प्रश्न 2. रेखाङ्किततानाम अव्ययानां सार्थकप्रयोगं कुरुत –

प्रश्न 3. वटिकाभुञ्जिजकयोः निर्माणविधिं लिखत–

प्रश्न 4. स्वगृहे निर्मितानि व्यञ्जनानि संस्कृतभाषया लिखत?

प्रश्न 5. अजा वा श्रृगालस्य विषये पञ्चवाक्यानि रचयत।

प्रश्न 6. काष्ठनिर्मितानि पञ्च वस्तूनां नामानि लिखत्।

R11EI9

––––000––––